श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ पञ्चदशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पञ्चदशः सर्गः ॥

## वनसुषमामवलोकयता हनुमता चैत्यप्रासादसन्निधौ दयनीयां सीतामालोक्येयमेव सेति तर्कणं तस्य प्रसन्नता च

स वीक्षमाणस्तत्रस्थो मार्गमाणश्च मैथिलीम्।
अवेक्षमाणश्च महीं सर्वां तामन्ववैक्षत॥ **5.15.1** ॥

सन्तानकलताभिश्च पादपैरुपशोभिताम्।
दिव्यगन्धरसोपेतां सर्वतः समलङ्कृताम्॥ **5.15.2** ॥

तां स नन्दनसङ्काशां मृगपक्षिभिरावृताम्।
हर्म्यप्रासादसम्बाधां कोकिलाकुलनिः स्वनाम्॥ **5.15.3** ॥

काञ्चनोत्पलपद्माभिर्वापीभिरुपशोभिताम्।
बह्वासनकुथोपेतां बहुभूमिगृहायुताम्॥ **5.15.4** ॥

सर्वर्तुकुसुमै रम्यैः फलवद्भिश्च पादपैः।
पुष्पितानामशोकानां श्रिया सूर्योदयप्रभाम्॥ **5.15.5** ॥

प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत।
निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत्॥ **5.15.6** ॥

विनिष्पतद्भिः शतशश्चित्रैः पुष्पावतंसकैः।
समूलपुष्परचितैरशोकैः शोकनाशनैः॥ **5.15.7** ॥

पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीम्।
कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः॥ **5.15.8** ॥

स देशः प्रभया तेषां प्रदीप्त इव सर्वतः।
पुन्नागाः सप्तपर्णाश्च चम्पकोद्दालकास्तथा ॥ **5.15.9** ॥

विवृद्धमूला बहवः शोभन्ते स्म सुपुष्पिताः।
शातकुम्भनिभाः केचित् केचिदग्निशिखप्रभाः ॥ **5.15.10** ॥

नीलाञ्जननिभाः केचित् तत्राशोकाः सहस्रशः।
नन्दनं विबुधोद्यानं चित्रं चैत्ररथं यथा ॥ **5.15.11** ॥

अतिवृत्तमिवाचिन्त्यं दिव्यं रम्यश्रियायुतम्।
द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतम् ॥ **5.15.12** ॥

पुष्परत्नशतैश्चित्रं पञ्चमं सागरं यथा।
सर्वर्तुपुष्पैर्निचितं पादपैर्मधुगन्धिभिः ॥ **5.15.13** ॥

नानानिनादैरुद्यानं रम्यं मृगगणद्विजैः।
अनेकगन्धप्रवहं पुण्यगन्धं मनोहरम् ॥ **5.15.14** ॥

शैलेन्द्रमिव गन्धाढ्यं द्वितीयं गन्धमादनम्।
अशोकवनिकायां तु तस्यां वानरपुङ्गवः ॥ **5.15.15** ॥

स ददर्शाविदूरस्थं चैत्यप्रासादमूर्जितम्।
मध्ये स्तम्भसहस्रेण स्थितं कैलासपाण्डुरम् ॥ **5.15.16** ॥

प्रवालकृतसोपानं तप्तकाञ्चनवेदिकम्।
मुष्णन्तमिव चक्षूंषि द्योतमानमिव श्रिया ॥ **5.15.17** ॥

निर्मलं प्रांशुभावत्वादुल्लिखन्तमिवाम्बरम्।
ततो मलिनसंवीतां राक्षसीभिः समावृताम् ॥ **5.15.18** ॥

उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः।
ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम् ॥ **5.15.19** ॥

मन्दप्रख्यायमानेन रूपेण रुचिरप्रभाम्।
पिनद्धां धूमजालेन शिखामिव विभावसोः ॥ **5.15.20** ॥

पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा।
सपङ्कामनलङ्कारां विपद्मामिव पद्मिनीम् ॥ **5.15.21** ॥

पीडितां दुःखसन्तप्तां परिक्षीणां तपस्विनीम्।
ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् ॥ **5.15.22** ॥

अश्रुपूर्णमुखीं दीनां कृशामनशनेन च।
शोकध्यानपरां दीनां नित्यं दुःखपरायणाम् ॥ **5.15.23** ॥

प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम्।
स्वगणेन मृगीं हीनां श्वगणेनावृतामिव ॥ **5.15.24** ॥

नीलनागाभया वेण्या जघनं गतयैकया।
नीलया नीरदापाये वनराज्या महीमिव ॥ **5.15.25** ॥

सुखार्हां दुःखसन्तप्तां व्यसनानामकोविदाम्।
तां विलोक्य विशालाक्षीमधिकं मलिनां कृशाम् ॥ **5.15.26** ॥

तर्कयामास सीतेति कारणैरुपपादिभिः।
ह्रियमाणा तदा तेन रक्षसा कामरूपिणा ॥ **5.15.27** ॥

यथारूपा हि दृष्टा सा तथारूपेयमङ्गना।
पूर्णचन्द्राननां सुभ्रूं चारुवृत्तपयोधराम् ॥ **5.15.28** ॥

कुर्वतीं प्रभया देवीं सर्वा वितिमिरा दिशः।
तां नीलकण्ठीं बिम्बोष्ठीं सुमध्यां सुप्रतिष्ठिताम् ॥ **5.15.29** ॥

सीतां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा।
इष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभामिव ॥ **5.15.30** ॥

भूमौ सुतनुमासीनां नियतामिव तापसीम्।
निःश्वासबहुलां भीरुं भुजगेन्द्रवधूमिव॥ **5.15.31** ॥

शोकजालेन महता विततेन न राजतीम्।
संसक्तां धूमजालेन शिखामिव विभावसोः॥ **5.15.32** ॥

तां स्मृतीमिव सन्दिग्धामृद्धिं निपतितामिव।
विहतामिव च श्रद्धामाशां प्रतिहतामिव॥ **5.15.33** ॥

सोपसर्गां यथा सिद्धिं बुद्धिं सकलुषामिव।
अभूतेनापवादेन कीर्तिं निपतितामिव॥ **5.15.34** ॥

रामोपरोधव्यथितां रक्षोगणनिपीडिताम्।
अबलां मृगशावाक्षीं वीक्षमाणां ततस्ततः॥ **5.15.35** ॥

बाष्पाम्बुपरिपूर्णेन कृष्णवक्राक्षिपक्ष्मणा।
वदनेनाप्रसन्नेन निःश्वसन्तीं पुनः पुनः॥ **5.15.36** ॥

मलपङ्कधरां दीनां मण्डनार्हाममण्डिताम्।
प्रभां नक्षत्रराजस्य कालमेघैरिवावृताम्॥ **5.15.37** ॥

तस्य सन्दिदिहे बुद्धिस्तथा सीतां निरीक्ष्य च।
आम्नायानामयोगेन विद्यां प्रशिथिलामिव॥ **5.15.38** ॥

दुःखेन बुबुधे सीतां हनुमाननलङ्कृताम्।
संस्कारेण यथा हीनां वाचमर्थान्तरं गताम्॥ **5.15.39** ॥

तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम्।
तर्कयामास सीतेति कारणैरुपपादयन्॥ **5.15.40** ॥

वैदेह्या यानि चाङ्गेषु तदा रामोऽन्वकीर्तयत्।
तान्याभरणजालानि गात्रशोभीन्यलक्षयत्॥ **5.15.41** ॥

सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ।
मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च ॥ **5.15.42** ॥

श्यामानि चिरयुक्तत्वात् तथा संस्थानवन्ति च।
तान्येवैतानि मन्येऽहं यानि रामोऽन्वकीर्तयत् ॥ **5.15.43** ॥

तत्र यान्यवहीनानि तान्यहं नोपलक्षये।
यान्यस्या नावहीनानि तानीमानि न संशयः ॥ **5.15.44** ॥

पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभम्।
उत्तरीयं नगासक्तं तदा दृष्टं प्लवङ्गमैः ॥ **5.15.45** ॥

भूषणानि च मुख्यानि दृष्टानि धरणीतले।
अनयैवापविद्धानि स्वनवन्ति महान्ति च ॥ **5.15.46** ॥

इदं चिरगृहीतत्वाद् वसनं क्लिष्टवत्तरम्।
तथाप्यनूनं तद्वर्णं तथा श्रीमद्यथेतरत् ॥ **5.15.47** ॥

इयं कनकवर्णाङ्गी रामस्य महिषी प्रिया।
प्रणष्टापि सती यस्य मनसो न प्रणश्यति ॥ **5.15.48** ॥

इयं सा यत्कृते रामश्चतुर्भिरिह तप्यते।
कारुण्येनानृशंस्येन शोकेन मदनेन च ॥ **5.15.49** ॥

स्त्री प्रणष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः।
पत्नी नष्टेति शोकेन प्रियेति मदनेन च ॥ **5.15.50** ॥

अस्या देव्या यथारूपमङ्गप्रत्यङ्गसौष्ठवम्।
रामस्य च यथारूपं तस्येयमसितेक्षणा ॥ **5.15.51** ॥

अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम्।
तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥ **5.15.52** ॥

दुष्करं कृतवान् रामो हीनो यदनया प्रभुः।
धारयत्यात्मनो देहं न शोकेनावसीदति ॥ **5.15.53** ॥

एवं सीतां तथा दृष्ट्वा हृष्टः पवनसम्भवः।
जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥ **5.15.54** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चदशः सर्गः ॥